# Shri Vishnustavaraja from Narasimhapurana

# શ્રીવિષ્ણુસ્તવરાજઃ નરસિંહપુરાણે

## Document Information

Text title : Shri Vishnustavaraja 1 from Narasimhapurana

File name : viShNustavarAjanarasimhapurANa.itx

Category : stavarAja, vishhnu, vishnu

Location : doc_vishhnu

Proofread by : Singanallur Ganesan singanallur at gmail.com

Translated by : https://archive.org/details/NarsimhaPuranGitapress

Description-comments : Narasimhapurana adhyAya 16

Latest update : June 6, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીવિષ્ણુસ્તવરાજઃ નરસિંહપુરાણે

શ્રીશુક ઉવાચ –
સંસારવૃક્ષમારુહ્ય દ્વન્દ્વપાશશતૈર્દૃઢૈઃ ।
બધ્યમાનઃ સુતૈશ્વર્યૈઃ પતિતો યોનિસાગરે ॥ ૧॥

યઃ કામક્રોધલોભૈસ્તુ વિષયૈઃ પરિપીડિતઃ ।
બદ્ધઃ સ્વકર્મભિર્ગૌણૈઃ પુત્રદારૈષણાદિભિઃ ॥ ૨॥

સ કેન નિસ્તરત્યાશુ દુસ્તરં ભવસાગરમ્ ।
પૃચ્છામ્યાખ્યાહિ મે તાત તસ્ય મુક્તિઃ કથં ભવેત્ ॥ ૩॥

શ્રીવ્યાસ ઉવાચ –
શ ृણુ વત્સ મહાપ્રાજ્ઞ યજ્જ્ઞાત્વા મુક્તિમાપ્નુયાત્ ।
તચ્ચ વક્ષ્યામિ તે દિવ્યં નારદેન શ્રુતં પુરા ॥ ૪॥

નરકે રૌરવે ઘોરે ધર્મજ્ઞાનવિવર્જિતાઃ ।
સ્વકર્મભિર્મહાદુઃખં પ્રાપ્તા યત્ર યમાલયે ॥ ૫॥

મહાપાપકૃતં ઘોરં સમ્પ્રાપ્તાઃ પાપકૃજ્જનાઃ ।
આલોક્ય નારદઃ શીઘ્રં ગત્વા યત્ર ત્રિલોચનઃ ॥ ૬॥

ગઙ્ગાધરં મહાદેવં શઙ્કરં શૂલપાણિનમ્ ।
પ્રણમ્ય વિધિવદ્દેવં નારદઃ પરિપૃચ્છતિ ॥ ૭॥

નારદ ઉવાચ –
યઃ સંસારે મહાદ્વન્દ્વૈઃ કામભોગૈઃ શુભાશુભૈઃ ।
શબ્દાદિવિષયૈર્બદ્ધઃ પીડ્યમાનઃ ષડૂર્મિભિઃ ॥ ૮॥

કથં નુ મુચ્યતે ક્ષિપ્રં મૃત્યુસંસારસાગરાત્ ।
ભગવન્ બ્રૂહિ મે તત્ત્વં શ્રોતુમિચ્છામિ શઙ્કર ॥ ૯॥

તસ્ય તદ્વચનં શ્રુત્વા નારદસ્ય ત્રિલોચનઃ ।

ઉવાચ તમૃષિં શમ્ભુઃ પ્રસન્નવદનો હરઃ ॥ ૧૦॥

મહેશ્વર ઉવાચ –
જ્ઞાનામૃતં ચ ગુહ્યં ચ રહસ્યમૃષિસત્તમ ।
વક્ષ્યામિ શ‍ૃણુ દુઃખઘ્નં સર્વબન્ધભયાપહમ્ ॥ ૧૧॥

તૃણાદિ ચતુરાસ્યાન્તં ભૂતગ્રામં ચતુર્વિધમ્ ।
ચરાચરં જગત્સર્વં પ્રસુપ્તં યસ્ય માયયા ॥ ૧૨॥

તસ્ય વિષ્ણોઃ પ્રસાદેન યદિ કશ્ચિત્ પ્રબુધ્યતે ।
સ નિસ્તરતિ સંસારં દેવાનામપિ દુસ્તરમ્ ॥ ૧૩॥

ભોગૈશ્વર્યમદોન્મત્તસ્તત્ત્વજ્ઞાનપરાઙ્મુખઃ ।
સંસારસુમહાપઙ્કે જીર્ણા ગૌરિવ મજ્જતિ ॥ ૧૪॥

યસ્ત્વાત્માનં નિબધ્નાતિ કર્મભિઃ કોશકારવત્ ।
તસ્ય મુક્તિં ન પશ્યામિ જન્મકોટિશતૈરપિ ॥ ૧૫॥

તસ્માન્નારદ સર્વેશં દેવાનાં દેવમવ્યયમ્ ।
આરાધયેત્સદા સમ્યગ્ ધ્યાયેદ્વિષ્ણું સમાહિતઃ ॥ ૧૬॥

યસ્તં વિશ્વમનાદ્યન્તમાદ્યં સ્વાત્મનિ સંસ્થિતમ્ ।
સર્વજ્ઞમમલં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૧૭॥

નિર્વિકલ્પં નિરાકાશં નિષ્પ્રપઞ્ચં નિરામયમ્ ।
વાસુદેવમજં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૧૮॥

નિરઞ્જનં પરં શાન્તમચ્યુતં ભૂતભાવનમ્ ।
દેવગર્ભં વિભું વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૧૯॥

સર્વપાપવિનિર્મુક્તમપ્રમેયમલક્ષણમ્ ।
નિર્વાણમનઘં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૨૦॥

અમૃતં પરમાનન્દં સર્વપાપવિવર્જિતમ્ ।
બ્રહ્મણ્યં શઙ્કરં વિષ્ણું સદા સઙ્કીર્ત્ય મુચ્યતે ॥ ૨૧॥

યોગેશ્વરં પુરાણાખ્યમશરીરં ગુહાશયમ્ ।
અમાત્રમવ્યયં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૨૨॥

શુભાશુભવિનિર્મુક્તમૂર્મિષટ્કપરં વિભુમ્ ।
અચિન્ત્યમમલં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૨૩॥

સર્વદ્વન્દ્વવિનિર્મુક્તં સર્વદુઃખવિવર્જિતમ્ ।
અપ્રતર્ક્યમજં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૨૪॥

અનામગોત્રમદ્વૈતં ચતુર્થં પરમં પદમ્ ।
તં સર્વહૃદ્ગતં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૨૫॥

અરૂપં સત્યસઙ્કલ્પં શુદ્ધમાકાશવત્પરમ્ ।
એકાગ્રમનસા વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૨૬॥

સર્વાત્મકં સ્વભાવસ્થમાત્મચૈતન્યરૂપકમ્ ।
શુભ્રમેકાક્ષરં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૨૭॥

અનિર્વાચ્યમવિજ્ઞેયમક્ષરાદિમસમ્ભવમ્ ।
એકં નૂત્નં સદા વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૨૮॥

વિશ્વાદ્યં વિશ્વગોપ્તારં વિશ્વાદં સર્વકામદમ્ ।
સ્થાનત્રયાતિગં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૨૯॥

સર્વદુઃખક્ષયકરં સર્વશાન્તિકરં હરિમ્ ।
સર્વપાપહરં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૩૦॥

બ્રહ્માદિદેવગન્ધર્વૈર્મુનિભિઃ સિદ્ધચારણૈઃ ।
યોગિભિઃ સેવિતં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૩૧॥

વિષ્ણૌ પ્રતિષ્ઠિતં વિશ્વં વિષ્ણુર્વિશ્વે પ્રતિષ્ઠિતઃ ।
વિશ્વેશ્વરમજં વિષ્ણું કીર્તયન્નેવ મુચ્યતે ॥ ૩૨॥

સંસારબન્ધનાન્મુક્તિમિચ્છન્ કામમશેષતઃ ।
ભક્ત્યૈવ વરદં વિષ્ણું સદા ધ્યાયન્ વિમુચ્યતે ॥ ૩૩॥

વ્યાસ ઉવાચ –
નારદેન પુરા પૃષ્ટ એવં સ વૃષભધ્વજઃ ।
યદુવાચ તદા તસ્મૈ તન્મયા કથિતં તવ ॥ ૩૪॥

તમેવ સતતં ધ્યાહિ નિર્બીજં બ્રહ્મ કેવલમ્ ।
અવાપ્સ્યસિ ધ્રુવં તાત શાશ્વતં પદમવ્યયમ્ ॥ ૩૫॥

શ્રુત્વા સુરઋષિર્વિષ્ણોઃ પ્રાધાન્યમિદમીશ્વરાત્ ।
સ વિષ્ણું સમ્યગારાધ્ય પરાં સિદ્ધિમવાપ્તવાન્ ॥ ૩૬॥

યશ્ચૈનં પઠતે ચૈવ નૃસિંહકૃતમાનસઃ ।
શતજન્મકૃતં પાપમપિ તસ્ય પ્રણશ્યતિ ॥ ૩૭॥

વિષ્ણોઃ સ્તવમિદં પુણ્યં મહાદેવેન કીર્તિતમ્ ।
પ્રાતઃ સ્નાત્વા પઠેન્નિત્યમમૃતત્વં સ ગચ્છતિ ॥ ૩૮॥

ધ્યાયન્તિ યે નિત્યમનન્તમચ્યુતં
હૃત્પદ્મમધ્યેષ્વથ કીર્તયન્તિ યે ।
ઉપાસકાનાં પ્રભુમીશ્વરં પરં
તે યાન્તિ સિદ્ધિં પરમાં તુ વૈષ્ણવીમ્ ॥ ૩૯॥

ઇતિ શ્રીનરસિંહપુરાણે વિષ્ણોઃ સ્તવરાજનિરૂપણે ષોડશોઽધ્યાયઃ ॥ ૧૬॥

Narasimhapurana adhyAya 16
https://archive.org/details/NarsimhaPuranGitapress

Proofread by Singanallur Ganesan singanallur at gmail.com

*Shri Vishnustavaraja from Narasimhapurana*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*